धन्वन्तरिरुवाच ।

नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ।
नमः कश्यपकन्यायै वरदायै नमो नमः ॥
नमः शङ्करकन्यायै शङ्करायै नमो नमः ।
नमस्ते नागवाहिन्यै नागेश्वर्य्यै नमो नमः ॥
नमो नागभगिन्यै च योगिन्यै च नमो नमः ।
नमोऽस्तीकजनन्यै च जनन्यै जगतां नमः ॥
नमो जरत्कारुनान्यै जरत्कारुस्त्रियै नमः ॥
नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ।
नमस्तपःस्वरूपायै फलदायै नमो नमः ॥
सुशीलायै च साध्व्यै च शान्तायै ते नमो नमः ।
इत्येवमुक्त्वा भक्त्या च प्रणनाम प्रयत्नतः ॥
तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धन्वन्तरिदर्पभङ्गमनसाविजयो नाम ५१ अध्यायः ॥ * ॥ (कामरूपस्थितनदीविशेषः । यथा, कालिकापुराणे । ७४ । १३ ।

"ततस्तु मनसा नाम नदी पुण्यतमा परा ।
चरित्रा मनसाख्या तु हयविन्दवतारिता ॥
वैशाखं सकलं मासं यस्यां स्नात्वा नरोत्तमः ।
विष्णुलोकमवाप्यैव ततो मोक्षमवाप्नुयात् ॥")

मनसादेवी, स्त्री, (मनसा चासौ देवी चेति । यद्वा, मनसा दीव्यतीति । दिव् + अच् । ङीप् । "मनसः संज्ञायाम् ।" ६ । ३ । ४ । इति विभक्त्यलुक् च ।) मनसा । इति जटाधरः ॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।४६।११८।

"सम्पूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ॥")

अस्या विवरणं मनसाशब्दे द्रष्टव्यम् ॥

मनसिजः, पुं, (मनसि जायत इति । जन् + डः । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इत्यमरः । १।१।२७ ॥ (यथा, शाकुन्तले द्वितीयाङ्के ।

"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शना-
श्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना
कुरुते ॥")

मनोजाति, त्रि ॥

मनसिशयः, पुं, (मनसि शेते इति । शी + "अधिकरणे शेते ।" ३। २ । १५ । इति अच् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इति हलायुधः ॥

मनस्कारः, पुं, (मनसि मनसो वा कारो निश्चय इति । यद्वा, कृ + भावे घञ् । मनसः कारो-विकारः करणमिति वा ।) मनसः सुखादिः । तत्पर्य्यायः । चित्ताभोगः २ । इत्यमरः । १ । ५ । ५ ॥ द्वे मनसः सुखादौ तत्परत्वे एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिराभोगः । आभोगस्तात्पर्य्यमिति सर्व्वानन्दः । स्थैर्य्य-मित्यन्ये । व्यापार इत्यपरे । वाञ्छितवस्तु-प्राप्त्या चित्तस्य निराकाङ्क्षता । आभोगः परिपूर्णतेति परे । अनागतचिन्तनादिरूपो मनस्कार इत्यपरे । मनसो मनसि वा कारो निश्चयो मनस्कारः सैतु करणेति सः । मनसि करणं मनसि कारः इत्यपि दृश्यते अत्र बाहुल्यात् सप्तम्या अलुक् । इति तट्टीकायां भरतः ॥

मनस्तापः, पुं, (मनसः तापः पीड़ा ।) मनः-पीड़ा । यथा, गारुड़े १११ अध्याये ।

"मनस्तापं न कुर्व्वीत आपदं प्राप्य पार्थिवः ।
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥"

अनुतापः । यथा, प्रायश्चित्ततत्त्वे ।

"ब्राह्मणेन यदा दैवात् छिन्नं यज्ञोपवीतकम् ।
मनस्तापेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥"

मनस्तालः, पुं (तल्यत इति । तल प्रतिष्ठायाम् + घञ् । मनसि तालः प्रतिष्ठा यस्य ।) दुर्गायाः सिंहः । इति त्रिकाण्डशेषः ॥ (हरितालः । तत्र क्लीवत्वमपि । यथा, वैद्यकरत्नमालायाम् ।

"हरितालं मनस्तालं वर्णकं नटभूषणम् ॥")

मनस्थं, त्रि, (मने मनसि वा तिष्ठतीति । स्था + कः । पक्षे विसर्गस्य लोपः ।) मनोऽवच्छिन्नम् । अन्तःकरणस्थितम् । यथा,—

"मनस्थं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्ध्यन्ति योगिनः ॥"

इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ब्रह्मनिरूपणं नाम १ अध्यायः ॥ "तादृशब्रह्मापरोक्षेण सुच्यते इत्याह मनस्थमित्यादि । मनस्थं मनोऽवच्छिन्नम् । मनमध्यस्थं मनःसाक्षीभूतम् । मध्यस्थं सर्व्वसाक्षीभूतम् । मनवर्ज्जितं सङ्कल्पविकल्पादिरहितम् । मननबोधात्मकम् । तदेवं मनसा परिशुद्धान्तःकरणेन । आलोक्य तद् गोचरापरोक्षचरमवृत्तिं लब्ध्वा । योगिनः ज्ञानिनः । स्वयमेव सिद्ध्यन्ति निवृत्ताविद्यका मुक्ता भवन्तीत्यर्थः ।" इति श्रीमदुत्तरगीतायाः सुबोधिन्यां टीकायां श्रीगौड़पादाचार्य्यविरचितायां १ अध्यायः ॥ * ॥ सर्व्वे सान्ता अदन्ताश्चेति प्रमाणादत्र मनशब्दोऽकारान्तः । मनःस्थितम् । यथा,—

"आजन्म मन्मनस्थं यदपि मम मनोमध्यतः
कापि नाभूत्
तत्ते पुण्यप्रतापादिह शरदि सतः सिद्धमाभूत्
सुखेन ॥"
इत्युद्भटः ॥

मनस्विनी, स्त्री, (प्रशस्तं मनोऽस्त्यस्याः इति । मनस् + विनि । ङीप् ।) प्रशस्तमनाः स्त्री । यथा, कुमारसम्भवे । ३ । ३२ ।

"मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥"

मृकण्डोः पत्नी । यथा, मार्कण्डेयपुराणे ।५२।१७।

"प्राणास्त्वेव मृकण्डुश्च पिता मम महायशाः ।
मनस्विन्यामहं तस्मात् पुत्त्रो वेदशिरा मम ॥"

प्रजापतिपत्नी । सा च सोमस्य वर्चोजननी । यथा, महाभारते । १ । ६६ । १९ ।

"धूम्रायास्तु धरः पुत्त्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्याः श्वसायाः श्वसनस्तथा ॥")

मनस्वी, [न्] पुं, (प्रशस्तं मनोऽस्त्यस्येति । मनस् + विनिः ।) शरभः । इति राजनिर्घण्टः ॥ प्रशस्तमनोयुक्ते, त्रि । यथा,—

"मनस्विगर्हितः पन्थाः समारोढुमसाम्प्रतम् ॥"
इति कारकटीकायां दुर्गादासः ॥

मनाक्, व्य, (मन्यते इति । मन ज्ञाने + बाहुलकात् आक्प्रत्ययः ।) अल्पम् । इत्यमरः । ३ । ४।८॥ (यथा, भागवते । १ । १० । ३५ ।

"मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्त्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्-
विभुः ॥")

मन्दः । इति मेदिनी । अव्यय-के, ११ ॥

मनाका, स्त्री, (मन्यत इति । मन + "बलाकादयश्च ।" उणा० ४ । १४ । इत्याकः । टाप् ।) हस्तिनी । इत्युणादिकोषः ॥

मनाकरं, क्ली, (मनाक् यथा तथा करोतीति । कृ + अच् ।) मङ्गल्या । मल्लिकागन्धयुक्तागुरु । इति शब्दचन्द्रिका । (मनाक् अल्पस्य करः ।) ईषत्कारके, त्रि ॥

मनायी, स्त्री, (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४।१।३८। इति ङीप् उदात्तैकारश्च ।) मनोः पत्नी । इति जटाधरः ॥

मनावी, स्त्री, (मनोः स्त्री । मनु + "मनोरौ वा ।" ४ । १। ३८ । इति ङीप् औकारश्चान्तादेशः ।) मनुपत्नी । इति मुग्धबोधव्याकरणम् ॥ (यथा, शतपथब्राह्मणे । १ । १ । ४ । १६ ।

"सा मनोरेव जायां मनावीं प्रविवेश ॥")

मनितं, त्रि, (मन बोधे + क्तः ।) ज्ञातम् । इत्यमरः । ३ । १ । १० ॥

मनीकं, क्ली, (मन्यते शोभार्थमाद्रियते इति । मन् + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधु ।) अञ्जनम् । इत्युणादिकोषः ॥

मनीषा, स्त्री, (ईष् + अः । टाप् । मनस ईषा गमनम् । "शकन्ध्वादिषु पररूपं वाच्यम् ।" ६ । १ । ९४ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, ऋग्वेदे । १ । ५४ । ८ ।

"असमं क्षत्रमसमा मनीषा ॥"

स्तुतिः । यथा, ऋग्वेदे । ५ । ८३ । १० ।

"उत प्रजाभ्योऽविदो मनीषाम् ॥"

"मनीषां स्तुतिमविद प्राप्तवानसि ॥" इति तद्भाष्ये सायनः ॥)

मनीषी, [न्] पुं, (मनीषा अस्त्यस्येति । मनीषा + व्रीह्यादित्वात् इनिः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा च मनौ । १ । १७ ।

"यन्मूर्त्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥")

बुद्धियुक्ते, त्रि ॥ (यथा, ऋग्वेदे ।१।१६४।४५ ।

"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ॥"

"मनीषिणो मेधाविनः ।" इति तद्भाष्ये सायनः ॥)